अनुक्रमांकः ...................................
निरीक्षकस्य हस्ताक्षरम् .......................

**Paper Code**
**BV-404**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा – मईमासः – 2018**

**बी. ए. व्याकरणम् (सत्रम् : चतुर्थम्)**

**संस्कृतम्**

**चतुर्थपत्रम्–वैदिकसिद्धान्तपरिचयः**

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 75**

---

**अवधेयम् :** इदं प्रश्नपत्रं पञ्चसप्ततेः (७५) अङ्कानां विद्यते। अत्र खण्डचतुष्टयं वर्त्तते। प्रत्येकं खण्डे प्रदत्तानां निर्देशानामनुसरणपुरस्सरमेव प्रश्नानां समाधानं कर्तव्यम्। अङ्कविभाजनं प्रत्येकं खण्डस्य प्रश्नस्य च पुरतः द्रष्टुं शक्यते।

## खण्ड – "अ"

### (वेदामृतम्–आचारशिक्षा) 20 अङ्काः

**प्रश्नः1– (क) वेदामृतस्याचारशिक्षायाः केचन पञ्चमन्त्राः लेखनीयाः।** **(1X5=05)**

**(ख)– निम्नलिखितेषु चतुर्णां मन्त्राणां शब्दार्थपुरस्सरं स्वशब्दैरर्थं बोधयन्तु।** **(2.5X4=10)**

(i) सं गच्छध्वं सं वदध्वं सं वो मनांसिजानताम्।
देवा भागं यथा पूर्वे सं जानाना उपासते।।

(i i)देवानां भद्रा सुमतिरृजूयतां देवानां रातिरभि जो निवर्तताम्।
देवानां सख्यमुपसेदिमा वयं देवा न आयुः प्रतिरन्तु जीवसे।।

(i i i)मोघमन्नं विन्दते अप्रचेताः सत्यं ब्रवीमिवध इत्सतस्य।
नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी।।

(iv)अक्षैर्मा दीव्यः कृषिमित्कृषस्व वित्ते रमस्व बहुमन्यमानः।
तत्र गावः कितव तत्र जाया तन्मे विचष्टे सवितायमर्यः।।

(v) कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे।।

**(ग)– अधोलिखितानां मन्त्राणां वेदो ज्ञापनीयः।** **(1X5=05)**

(i) आशीर्ण ऊर्जमुत सौप्रजास्त्वं .................................।

(i i) कारुरहं ततो भिषगुपलप्रक्षिणी ..............................।

(i i i)तिस्रोदेवीर्बर्हिरेदं सदन्त्विडा ....................................।

(iv) शक्रोऽसि भ्राजोऽसि स्वरसि ..............................।

(v) समानी व आकूतिः .................................................।

## खण्ड – "ब"

### (दर्शनम्) 15 अङ्काः

**प्रश्नः2–(क) द्वयोः सूत्रयोरग्रे पञ्च–पञ्च सूत्राणि लेखनीयानि।** **(2.5X2=05)**

(i) स्थूलात् पञ्चतन्मात्रस्य।

(ii) अविशेषश्चोभयोः।

(iii) समानः प्रकृतेर्द्वयोः।

(iv) प्रतिबन्धदृशः प्रतिबद्धज्ञानमनुमानम्।

**(ख)- अधोलिखितानां सूत्राणामर्थं बोधयन्तु।** (1X5=05)

(i) नाशक्योपदशेविधिरुपदिष्टेऽप्यनुपदेशः।।

(ii) नियतकारणात्तदुच्छित्तिर्ध्वान्तवत्।।

(iii) ईश्वरासिद्धेः।।

(iv) न कालयोगतो व्यापिनो नित्यस्य सर्वसम्बन्धात्।।

(v) प्रधानाविवेकाद् अन्याविवेकस्य तद्धाने हानम्।।

**(ग)- निम्नोक्तेषु द्वौ प्रश्नौ समाधेयौ।** (2.5X2=05)

(i) सांख्यदर्शनस्य तत्वगणं व्याख्यायन्तु।

(ii) प्रत्यक्षप्रमाणं ससूत्रं वर्णयन्तु। तस्मिन् को दोषः सम्भाव्य निराक्रीयते।

(iii) पुरुषः असङ्गो अस्ति चेत् कथ फलं भुडक्ते?

(iv) आनुश्रविकैर् उपायैर् मोक्षसिद्धिः भवति न वा इति ससूत्रं वर्णयन्तु।

## खण्ड - "स"

## (उपनिषद्) 20 अङ्काः

**प्रश्नः3-(क) मुण्डकोपनिषत्तः स्मृताः केचन पञ्च मन्त्राः लेखनीयाः।** (2X5=10)

**(ख)- चत्वारः प्रश्नाः समाधेयाः -** (2.5X4=10)

(i) विदुषः ब्रह्मप्राप्तिर् नदीदृष्टान्तेन समन्त्रं वर्णयन्तु।

(ii) कथमस्माभिर् ब्रह्म वेद्धव्यः समन्त्रं व्याख्यायन्तु।

(iii) इष्टापूर्तमेव श्रेष्ठतमं मन्वानानां का स्थितिर् भवति समन्त्रं बोधयन्तु।

(iv) इदं विश्वं कथं सम्भवतीति सोदाहरणेन मन्त्रेण वर्णयन्तु।

(v) के द्वे विद्ये स्तः मन्त्रैः सह वर्णयन्तु।

## खण्ड - "द"

## (मनुस्मृति/चर्पटमञ्जरी) 20 अङ्काः

**प्रश्नः4-(क) स्वस्मृत्या मञ्जरीस्मृत्योः केचन पञ्च-पञ्च श्लोका लेखनोयाः।** (1X10=10)

**(ख)- पञ्चानां श्लोकानाम् अर्थो लेखनीयः।** (2X05=10)

(i) तपो विद्या च विप्रस्य निःश्रेयसकरं परम्।
तपसा किल्विषं हन्ति विद्ययामृतमश्नुते।।

(ii) आत्मैव देवताः सर्वाः सर्वमात्मन्यवस्थितम्।
आत्मा हि जनयत्येषां कर्मयोगं शरीरिणाम्।।

(iii) इन्द्रियाणां प्रसंगेन धर्मस्यासेवनेन च।
पापान् संयान्ति संसारान् अविद्वांसो नराधमाः।।

(iv) का ते कान्ता कस्ते पुत्रः
संसारोयमतीव विचित्रः।
कस्य त्वं कः कुत आयातस्
तत्त्वं चिन्तय तदिह भ्रातः।।

(v) सत्सङ्गत्वे निस्सङ्गत्व निस्सङ्गत्वे निर्मोहत्वम्।
निर्मोहत्वे निश्चलतत्वं निश्चलतत्वे जीवन्मुक्तिः।।

(vi) प्राणायामं प्रत्याहारं नित्यानित्यविवेकविचारम्।
जाप्यसमेत समाधिविधानं कुर्ववधानं महदवधानम्।।

--------------x--------------